अनुक्रमांकः ..................................

निरीक्षकस्य हस्ताक्षरम् ...........................

**Paper Code**
**MSS-202**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – मईमासः – 2019**

**एम.ए. संस्कृतम्, (सत्रम् : द्वितीयम)**

**संस्कृतम्**

**द्वितीयपत्रम्–व्याकरणम्**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' इत्याख्येषु त्रिषु खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

## खण्डः क
## (दीर्घोत्तरीयप्रश्नाः)

**निर्देशः 'क'** खण्डे पञ्चदीर्घोत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चदशाङ्काः निर्धारिताः वर्तन्ते। एतत्पञ्चप्रश्नेषु त्रयः प्रश्नाः एव समाधेयाः। **(3×15=45)**

1. अधोलिखितेषु सूत्रेषु द्वयोः सूत्रयोः सोदाहरणं व्याख्या कार्या –
   (क) मेर्निः (ख) अनद्यतने लङ् (ग) झोऽन्तः (घ) रि च।
2. अधोलिखितेषु द्वयोः सिद्धिः कार्या – भवतु, अभवत्, भव, भवेत्, भवामि।
3. निम्नाङ्कितेषु सूत्रेषु द्वयोः सोदाहरणं व्याख्या विधेया –
   (क) वर्तमाने लट् (ख) शेषे प्रथमः (ग) च्लि लुङि (घ) ह्रस्वं लघु।
4. निम्नाङ्कितेषु पदेषु द्वयोः सिद्धिः कार्या – भवति, भविष्यति, अतति, भवथ, भवामः।
5. अधोलिखितेषु द्वयोः समाधानं कुरुत।
   (क) प्रथममध्यमोत्तमसंज्ञकाः प्रत्ययाः के सन्ति ?
   (ख) "तङ्" इत्यनेन के के प्रत्ययाः गृहीता भवन्ति ?
   (ग) लकाराणां नामानि क्रमशः लिखत।
   (घ) लादेशाः कति सन्ति, क्रमशः तान् लिखत।

## खण्डः ख
## (लघूत्तरीयप्रश्नाः)

**निर्देशः 'ख'** खण्डे षड्लघूत्तरीयप्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चाङ्काः निर्धारिताः विद्यन्ते। एतेषु केवलं चत्वारः एव प्रश्नाः समाधेयाः। **(4×5=20)**

1. अधोलिखितेषु द्वयोः सूत्रयोः सोदाहरणं व्याख्या विधेया –
   (क) ण्वुल्तृचौ (ख) कर्मण्यण् (ग) धातोः (घ) कर्त्तरि कृत् ।
2. अधोलिखितेषु द्वयोः पदयोः सिद्धिः कार्या –
   (क) कारकः (ख) नन्दनः (ग) एधितव्यम् (घ) चेयम् ।
3. अधोलिखितेषु द्वयोः सूत्रयोः सोदाहरणं व्याख्या विधेया –
   (क) गेहे कः (ख) चरेष्टः (ग) क्विप् च (घ) अचो यत्
   (ङ) पोरदुपधात् ।
4. अधोलिखितेषु द्वयोः पदयोः सिद्धिः कार्या –
   (क) बुधः (ख) प्रज्ञः (ग) गोदः (घ) स्तुत्यः (ङ) मृज्यः।

5. निर्दिष्टलकारेषु द्वयोः धात्वोः रूपाणि लिखत –

(क) अद् (लोट्) (ख) चुर् (लट्) (ग) हु (लोट्) (घ) पा (लट्)

6. अधोलिखितेषु द्वयोः समाधानं कुरुत–

(क) निष्ठासंज्ञकौ प्रत्ययौ कौ स्तः? सोदाहरणं लिखत।

(ख) "वशंवदः" इति पदं साध्यताम्।

(ग) बहुलं किं भवति ?

(घ) कृत्यप्रत्ययाः के? नामानि लिखत।

## खण्डः ग
## (अतिलघूत्तरीयाः प्रश्नाः)

**निर्देशः 'ग'** खण्डे दशातिलघूत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय अर्द्धाङ्कः निर्धारितः वर्तते। अस्मिन् खण्डे प्रदत्तानां सर्वेषां प्रश्नानाम् उत्तरणमनिवार्यमस्ति । **(10×0.5=05)**

1. "अव्ययीभावः" इति सूत्रं कीदृशम् ?
   (अ) परिभाषासूत्रम् (ब) अधिकारसूत्रम्
   (स) संज्ञासूत्रम् (द) अतिदेशसूत्रम्
2. "पञ्चगङ्गम्" इत्यत्र कः समासोऽस्ति ?
   (अ) द्विगुः (ब) अव्ययीभावः
   (स) तत्पुरुषः (द) बहुव्रीहिः
3. उभयपदार्थप्रधानः कः समासो विद्यते ?
   (अ) अव्ययीभावः (ब) तत्पुरुषः
   (स) द्वन्द्वः (द) बहुव्रीहिः
4. "अभवत्" इति भूधातोः कस्य लकारस्य रूपम् ?
   (अ) लट्लकारस्य (ब) लृट्लकारस्य
   (स) लोट्लकारस्य (द) लङ्लकारस्य
5. "क्यप्" इति प्रत्ययस्य का संज्ञा अस्ति ?
   (अ) कृत्यसंज्ञा (ब) तद्धितसंज्ञा
   (स) सत्संज्ञा (द) उपपदसंज्ञा
6. तन् धातोः कोऽर्थः विद्यते ?
   (अ) सत्ता (ब) विनाशः
   (स) विस्तारः (द) शाखा
7. "लघुसिद्धान्तकौमुदी" इत्यस्या रचयिता कः ?
   (अ) पाणिनिः (ब) पतञ्जलिः
   (स) वरदराजः (द) भट्टोजिदीक्षितः
8. 'कर्त्तव्यम्' इत्यत्र प्रत्ययोऽस्ति ..........
   (अ) यत् (ब) तव्यत्
   (स) ण्यत् (द) यत्
9. एषः स्त्रीप्रत्ययोऽस्ति ..........
   (अ) ण्वुल (ब) टाप्
   (स) तमुन् (द) तृच्
10. इदं सूत्रं इत्संज्ञाविधायकमस्ति ..........
    (अ) चूटू (ब) तस्य लोपः
    (स) अदर्शनं लोपः (द) क्ङिति च

---------------x---------------